लोकभाषाप्रचारसमिते: मासिकं मुखपत्रम्

# लोकभाषासुश्री:

*The Monthly news magazine of a National Movement - LOKABHASHA SHUSHREE*

सरस्वतीविहार:, बरपदा, भद्रक - ७५६११३ १९७, बापुजीनगर, भुवनेश्वर-७५१००९

मिथुन: - आषाढ: , शकाब्द: - १९४०, युगाब्द: - ५११९ जुन - २०१८

मुख्यसंपादक:-डॉ. सदानन्द दीक्षित:
चलदूरभाषम्- ०९४३८२९८१८१
संपादक:-डॉ सुशान्तकुमारराज:
चलदूरभाषम्-९४३८४७७०८३
प्रबन्धसंपादक:-श्री शुभेन्दु रथ:
चलदूरभाषम्-९२३७०३५८८४

Email : lokaprajna@gmail.com,
Website : http : //sarasvati.org.in

## पुर्याम् आयोजितम् लोकभाषाप्रचारसमितिपक्षत: षष्ठं

# राष्ट्रियं संस्कृतमहाधिवेशनम्



विशिष्टातिथिभि: समिते: प्रकाशनं लोकार्पितं क्रियते ।

**पुरी:** ज्येष्ठशुक्लैकादशीत: त्रयोदशीपर्यन्तं तदनुसारं २०१८ मई २५. त २७ पर्यऽन्तं दिनत्रयात्मकं संस्वृ्तमहाधिवेशनं महतोत्साहेन समनुष्ठितम्। २५.५.२०१८ प्रात: ११ वादने गोपबन्धु- आयुर्वेद महाविद्यालयस्य सभागृहे विश्वधर्मशान्तिपरिषदोऽध्यक्षा: पूज्या: पुत्तिगे मठमहास्वामिन: श्रीश्रीसुगुणेन्द्रतीर्थपादा: वेदध्वनिपुर:सरं महाधिवेशनमिदं समुद्घाट्य संस्कृतं



पूज्यस्वामि-श्रीश्रीसुगुणेन्दतीर्थपादै: समुद्घाटनं विधीयते ।

लोकोत्तरकल्याणकारिणी दिव्यभाषा वर्तते, अस्या: शिक्षा-सुरक्षा-प्रसारादिकर्म दिव्यफलदायकमिति दिव्यप्रवचनपूर्वकम् आशीर्वादं प्रदत्तवन्त:। स्वामिचरणानां करकमलाभ्यां संस्कृतक्षेत्रेऽद्वितीयतां



सभापते: श्रीकार्तिकचन्द्रचान्दमहोदयस्य साभापत्योद्बोधनम् ।

संपादितवद्भ्यो नवविधसत्पुरुषेभ्य: रांकव-नारिकेलसहितं मान्यफलकं समर्पितम्। अद्वितीयं व्यक्तित्वं धारयन् संस्कृताविद्वान् कुलाधिपतिरूपेण विराजमान: डा. प्रफुल्ल कुमार मिश्र:, असमराज्यस्य वैष्णवधर्मविचारस्य सर्वोच्चगुरु: आयुनियति सत्राध्यक्ष:डा. श्रीश्री पीताम्बरदेवगोस्वामी, संस्कृतविद्वान्



संस्कृतज्ञ- राजेनेतृभ्य: श्रीप्रतापचन्द्रषडंगिभ्य: संस्कृतवीश: सम्मान:।

तथा राजनेता श्रीप्रतापचन्द्र षडङ्गी, नासासंस्थाया: पूर्ववैज्ञानिक:



वैदिकवैज्ञानिकैभ्य: डा. ओम्प्रकाशपाण्डेयेभ्य: वेदसरस्वती सम्मानप्रदानम्।

वेदविज्ञानतत्त्वज्ञ: डा. ओम्प्रकाश-पाण्डेय:, श्रुतिदैनिकपत्रिकाया: संपादक: पण्डितसर्वेश्वरमिश्र:, प्राचीनमातृकाग्रन्थ-



असमीयवैष्णवधर्मगुरुभ्य: श्रीश्री डा. पीताम्बर देवगोस्वामिभ्य: धर्मरत्नं सम्मान:

राजिमहासंपादक: मद्रासविश्वविद्यालय-संस्कृतविभागमुख्य: डा. सिनिरुद्धदाश:, संस्कृत-विद्वान् किन्तु प्रतिभा प्रकाशन संस्थासंस्थापक: डा. राधेश्यामशुक्ल:,


कुलाधिपतिप्रवरेभ्यः प्रो. प्रफुल्लकुमारमिश्रेभ्यः प्रज्ञासरस्वतीसम्मानप्रदानम्।

संस्कृतिपरायणसमाजसेवी डा. किशनलाल भरतिया प्रमुखाः विविधोपाधिभिः सम्मानिताः।


संस्कृति-समाजसंरक्षकेभ्यः डा. किशनलाल अग्रवालेभ्यः (भरतिआ) संस्कृतिसरस्वती सम्मानः।

सभाध्यक्षरूपेण समुपस्थितः समितेः सभापतिः श्रीकार्त्तिकचन्द्रचान्दः संस्कृतम् दिव्यज्ञानगर्भितम्, अतः तस्याः अवदानम् प्रशंसनीयमिति उद्बोधितवान् । लोकसेवक-मण्डलस्य राष्ट्रियमहासचिवः श्रीनिरञ्जन रथः तथा मुख्यवक्तृरूपेण किस्


संस्कृतज्ञ-दैनिपत्रिकासंपादकेभ्यः पण्डितसर्वेश्वरमिश्रेभ्यः श्रुतिसरस्वती सम्मानः।

विश्वविद्यालयस्य कुलपतिः प्रो. हरेकृष्ण शतपथी लोकभाषाप्रचारसमितेः उद्देश्यं कार्ययोजनां च प्रशंसितवन्तौ । राष्ट्रियाध्यक्षः डा. सदानन्ददीक्षितः सभां संचालितवान्। आदौ संस्कृतशिविरा


मुख्यवक्ता किस्विश्वविद्यालयस्य कुलपतिः प्रो हरेकृष्ण शतपथी।

थिनीभिः स्वागतगीतं प्रस्तुतम् , अनन्तरं प्रो. कमलेशमिश्रः स्वागतवचोभिः सभां सम्बोधितवान्। प्रो. सत्यनारायणाचार्यः कृतज्ञतां समर्पितवान्।


उद्घाटनसमारोहे विशालाविद्वत्सभा विराजते।

२५.५.२०१८ दिनाङ्के अपराह्णे विश्वविख्यातनासामहाकाशगवेषणा-संस्थायाः वैज्ञानिकः डा. ओम्प्रकाश पाण्डेयः मुख्यवक्तृरूपेण घंटाद्वयं


नासावैज्ञानिकस्य ड. ओम्प्रकाशपाण्डेयस्य तात्त्विकमुद्बोधनम्।

वैदिकविज्ञानं कथं सर्वजनहिताय तत्सर्वं रोचकतया प्रख्यापितवान्। तस्मिन् विशेषकार्य्यक्रमे रामकृष्णाश्रमस्याध्यक्षः स्वामी वैराग्यानन्दसरस्वती, श्री जगन्नाथसंस्कृत विश्वविद्यालयस्य


अपराह्णसत्रे समवेताः विद्वांसः अतिथयश्च।

कुलपतिः प्रो.राधामाधव दाशः किस् विद्यालयस्य कुलपतिः प्रो. हरेकृष्णशतपथी मंचासीनाः आसन् । पंचशताधिकाः संस्कृतविद्वांसः चकिताः सन्तः डा. पाण्डेय- महोदयस्य तत्त्व-तथ्यसंम्बलितं भाषणं आस्वादितवन्तः। अन्ते स्वामि-वैराग्यानन्द सरस्वती-


सायंसत्रे रामकृष्णाश्रमस्य पूज्यस्वामिवैराग्यानन्द-सरस्वतीमहाराजाः।

महोदयाः संस्कृतप्रशिक्षण शिविरस्य कृतिच्छात्रेभ्यः प्रतिभा प्रमाणपत्राणि प्रदत्तवन्तः।


श्रीजयदेवस्य गीतगोविन्दाधारेण नृत्यम् ।

रात्रौ ७ वादनात् ९ पर्यन्तं शिविरच्छात्रैः विविधमनोरंजनकार्यक्रमाः वेदकर्मकाण्डमहाविद्यालयाध्यक्षस्य डा. जगबन्धुमिश्रस्य सभाध्यक्ष्ये आयोजिताः। सुश्रीः प्रतिमारथः कार्यक्रमाणां संयोजनां


शिविरछात्रैः 'लोकहितं मम करणीयम्' लोकनृत्यं प्रदर्शित्

कृतवती । 'विवेकोदयम्' संस्कृतनाटकम् रुचिरतयाभिनीतम्। अनन्तरं 'लोकहितं ममकरणीयम्' इति नृत्यसंगीतम् मनोहारितया प्रस्तुतम्। 'सर्वेषां नो जननी भारत धरणी कल्पलतेयम्'


राष्ट्रियपाण्डुलिपिमिशन् पक्षतः आयोजिता मातृकाप्रदर्शनी।

इतिराष्ट्रभावगर्भितगीतेन सर्वेषां सहृदयानां हृदयं उल्लसितम् । तदनु शान्तिमन्त्रपाठं प्रस्तूय कार्यक्रमः समापितः।

ततःपरं लोकभाषाप्रचारसमितेः सांघटनिकी सभा डा. सदानन्द



लोकभाषाप्रचारसमितेः डा. सदानन्द दीक्षितस्याध्यक्ष्ये सांघटनिकी सभा

दीक्षितस्याध्यक्ष्ये आयोजिता। समितिपक्षतः आगामिनि वर्षे १० संस्कृतप्रशिक्षकाः नियोजनीयाः ,



धन्यवादार्पणं करोति प्राध्यापिका डा. हरप्रिया दाशः

एककोटिरूप्यकाणां संग्रहः, अन्येषु राष्ट्रेषु संस्कृतसंभाषणाभ्यासशिविराणि आयोजनीयानि-इत्यादयः प्रस्तावाः गृहीताः। प्रत्येकं सदस्यः वार्षिकं ५००० रूप्यकाणि ददातु इति अध्यक्षः सर्वान् अनुरुद्धवान् । डा. निरंजन साहुः सभां संयोजितवान्, डा. सुशान्तचान्दः धन्यवादं प्रकटितवान् । तत्रैव परिसरे रात्रि भोजनं समाप्य श्वस्तनकार्यक्रमार्थं स्वस्थानं प्रस्थितवन्तः।

२६.५.२०१८ दिनाङ्के प्रातः १० वादने राष्ट्रियसंस्कृतसंस्थानस्य



राष्ट्रियचर्चासत्रस्योद्घाटनीयं भाषणम् प्रो. सिनिरुद्धदाशैः

श्रीसदाशिवपरिसरे प्राचीप्रज्ञा प्रो. सिनिरुद्ध दाशमहोदयाः राष्ट्रियचर्चासत्रस्य



राष्ट्रियसंस्कृतसम्मेलनस्य अध्यक्षः प्रो. अतुल कुमार नन्दः

समुद्घाटनं दीपप्रज्ज्वालनपूर्वकं विहितवन्तः। उद्घाटनसमारोहे स्वागतं कृतवान् परिसरस्य प्राचार्यः प्रो. अतुलचन्द्रनन्दः, अध्यक्षतां च कृतवान् श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरविभागमुख्यः प्रो. हरिहर होता ।



राष्ट्रियचर्चासत्रे आध्यक्ष्यभाषणं प्रो. हरिहरहोता।

चतुर्षु सत्रेषु शोधपत्रवाचनं कर्तुं संयोजनां कृतवान् श्रीजगन्नाथ संस्कृतिविश्व विद्यालयस्य साहित्यविभागमुख्यः स्मृतिसंचिकासंपादकः प्रो. वसन्त कुमारमिश्रः। सत्राध्यक्षरूपेण



वादिराजशेधसंस्थानस्य निदेशकः डा. बी. गोपालाचार्यः।

श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य आचार्य्यचरः प्रो. प्यारीमोहनपट्टनायकः, पण्डिचेरीकेन्द्रीयविश्वविद्यालयस्याचार्यः प्रो. चक्रधरबेहेरा, तिरूपतिस्थ राष्ट्रियसंस्कृत-विद्यापीठस्याचार्यः प्रो. सत्यनारायणाचार्य तथा गौहाटीस्थ-राजकीयसंस्कृतमहाविद्यालयस्याचार्यः



चर्चासत्रे समवेताः अतिथयः विद्वांसः भागभागिनश्च।

डा. गोकुलेन्द्रनारायणदेवगोस्वामी शोधपत्रवाचनं कारितवन्तः। देशस्य विविधभागेभ्यः समागताः ५५ विद्वांसः



ग्रन्थलोकार्पणमहोत्सवे अध्यक्षः प्रकाशपुरुषोत्तमः डा. राधेश्यामशुक्लः

गवेषकाश्च ‘संस्कृतं सभ्यता-परिपोषकम्’, ‘संस्कृतं मानवीयमूल्यबोध-संवर्धकम्’, ‘संस्कृतं राष्ट्रैक्यसंपादकं’, ‘संस्कृतं वैदेशिकसंपर्काधारसूत्रम्’ इति चतुर्षु विषयेषु सुचिन्तितं शोधप्रबन्धमुपस्थापितवन्तः। समापन-समारोहे



चर्चासत्रे मंचासीनाः सत्राध्यक्षाः

आध्यक्ष्यं विधाय डा. सदानन्ददीक्षितः न केवलं संख्यादृष्ट्या सन्तोषं प्रकटितवान् अपितु तात्त्विकविचारेण परिपुष्टान् शोधलेखान् प्रशंसितवान्। अध्यापकसनातन पण्डा धन्यवादार्पणं कृतवान्।





राष्ट्रिय संस्कृतविसम्मेलनस्य सभापतिः गीतिकविः प्रो. हरेकृष्णमेहेरः

२७.०५.२०१८ दिनाङ्के प्रातः अवशिष्टशोधपत्राणां वाचनं प्रो. सिनिरुद्धदाश-महोदयानां महाध्यक्ष्ये आरब्धम्। डा. नित्यानन्दमिश्रः संयोजनां



कृतवान्, सभापत्यं च कृतवन्तः प्रो. प्यारीमोहनपट्टनायकमहोदयाः। राजस्थानसंस्कृतशिक्षाधिकारी डा. निरञ्जनसाहुः समीक्षकरूपेणोपस्थित आसीत्। अन्तिमे श्रीसदाशिव-



चर्चासत्रे शोधप्रबन्धपाठनम्

परिसरस्योपाचार्यः डा. मदनमोहन झा, धन्यवादार्पणं कृतवान्।



उद्घाटनसमारोहे डा. गोकुलेन्द्रनारायणदेवगोस्वामिनः ग्रन्थलोकार्पणम्।

द्वितीयाधिवेशनं संस्कृतकविसम्मेलनं गीतिकवि-प्रो. हरेकृष्ण-मेहेरस्याध्यक्ष्ये महोल्लासेन आयोजितम्।



चर्चासत्रे शोधप्रबन्धपाठनम्

श्रीजगन्नाथ-संस्कृत विश्वविद्यालय-व्याकरणविभागप्राध्यापकः डा. पूर्णचन्द्र पाढी संयोजनां कृतवान्। संस्कृतपालागायकः पण्डितगदाधरदाशः पालाशैल्याम् आधुनिकसंस्कृतगीतानि



समापनसमारोहे डा. नित्यानन्दमिश्रस्य ग्रन्थलोकार्पणम्।

मधुरस्वरेण परिवेषितवान् येन सर्वे सहृदयाः सभासदः आनन्दमुखराः संजाताः। १८ कवयः स्वकविताः परिवेषितवन्तः। अन्ते महाकविः पं. गोविन्दचन्द्रमिश्रः शुभाशिषा सर्वान् परितोषितवान्। आदौ दिल्लीतः समागतः



भागवतशिशुः श्री रामानुजगुप्ता अनर्गल-भागवतपारायणं कृतवान्।

सम्मान्यातिथिः प्रो. प्रभातरंजनमहापात्रः सस्कृतभाषायाः शिक्षासुरक्षाप्रचारार्थं



समापनसमारोहे समवेताः अतिथयः विद्वांसः भागभागिनश्च

लोकभाषाप्रचारसमितिपक्षतः क्रियमाणः समुद्यमः प्रशंसनीयः इति स्वाभिमतं प्रकाशितवान्। विशिष्टातिथिः पण्डित



चर्चासत्रे शोधप्रबन्धपाठनम्

गोविन्दचन्द्रमिश्रः एतदृशं महाधिवेशनं प्रतिवर्षं आयोजनीयमिति आशां प्रकटितवान्। प्रो. सिनिरुद्ध दाशः संस्कृतगवेषणार्थम् समधिकप्रयासानाम् आवश्यकतास्तीति सभामुद्बोधितवान्।



भागभागिभ्यः प्रमाणपत्रप्रदानम्

समितेः राष्ट्रियाध्यक्षः डा. सदानन्ददीक्षितः एतदृशं महाधिवेशनं सितम्बरमासे आयोजयिष्यते इति समुद्घोषितवान्। समुद्घाटकाः दिव्यजीवनसंघस्य स्वामिजितमोहानन्दसरस्वतीचरणाः संस्कृतमेव भारतीयताराष्ट्रियता-



भागभागिभ्यः प्रमाणपत्रप्रदानम्




संस्कृतसेवि-विद्वद्भ्यः विविधोपाधिप्रदानम्

धार्मिकतादीनां सद्गुणानां प्राणाधायकम्, अतः राष्ट्रहिताय संस्कृतस्य महती आवश्यकताऽस्तीति स्वाभिमतं प्रकाश्य संस्कृतनिमित्तं प्राणपातः समुद्यम



पूज्यस्वामिनां समापनसमारोहे आशीर्वचनम् ।

आवश्यकः इति सानन्दं समुच्छ्वासं प्रकटितवान्। अस्मिन्नवसरे समितिपक्षतः निश्चिताः कृताभूरिपरिश्रमाः संस्कृतसेवकाः नानोपाधिभिः पूज्यस्वामिपादैः साशीर्वादं सम्मानिताः। तेषु प्रो. सत्यनारायणाचार्यः (तिरुपतिः) प्रो. चक्रधर बेहेरा (पण्डिचेरी),





संस्कृतसेवि-विद्वद्भ्यः विविधोपाधिप्रदानम्

डा. निरंजन साहुः (अजमेर), डा. गोकुलेन्द्रनारायणदेवगोस्वामी (गुआहाटी), डा. बी. कल्याणरामन् (चेन्नई), डा. बि. गोपालाचार्यः (उडुपि), डा. वसन्तकुमारमिश्रः (पुरी), डा. जगबन्धुमिश्रः (पुरी) संस्कृतलोकप्रज्ञा इत्युपाधिना सभाजिताः। तथैव श्रीहरेकृष्णपाणिग्राही (याजिपुरम्),



संस्कृतसेवि-विद्वद्भ्यः विविधोपाधिप्रदानम्

श्रीलक्ष्मीधर बेहेरा (याजिपुरम्), विभूतिनारायणकरः (सालेपुरम्), मनोरंजनपूजारी (कोरापुटम्) श्री संजयकुमार गुप्ता (दिल्ली)

श्रीदैत्यारीपूजारी (बलांगीरम्), डा. प्रकाशचन्द्रमिश्रः (पिपिलि), श्रीविनायकप्रधानः (पुरी), सुश्री प्रतिमा



संस्कृतसेवि-विद्वद्भ्यः विविधोपाधिप्रदानम्

रथ(पुरी) श्रीशारदासागरमहान्ति (कलाहाण्डि), सुशान्तकुमार साहुः (सम्बलपुरम्) प्रमुखाः लोकभाषा-सरस्वती उपाधिना विभूषिताः। तथैव डा. मनोरमा दाशः(पुरी), डा. हरप्रियादाशः(पुरी), श्री ओम्प्रकाश गुप्ता (दिल्ली) सेवासरस्वती सम्मानेन सम्मानिताः। परिशेषे सामूहिकशान्ति-



अन्तिमे डा. वसन्तकुमारमिश्रस्य धन्यवादार्पणम् सर्वेभ्यः।

मंत्रपाठेन महाधिवेशनम् सुसंपन्नं संजातम्। जयतु भारतम् । जयतु संस्कृतम्।।

# पुर्यामायोजितं ८५तमं संस्कृतप्रशिक्षकप्रशिक्षणशिविरम्

## संस्कृतस्य विकाशेन भारतं सुदृढं भवति: - डॉ. सदानन्द दीक्षित:




संस्कृतप्रशिक्षणशिविरोद्घाटनसत्रे भाषमाणा: स्वामिन: डा. शंकरननद महाराजा:।

**पुरी:** लोकभाषाप्रचारसमितिपक्षत: पुरीस्थश्री-जगन्नाथवेदकर्मकाण्ड-महाविद्यालये १५.०५.२०१८ दिनाङ्के अपराह्णे आयोजिते ८५ तम-संस्कृतप्रशिणक्षशि-विरस्योद्घाटन-समारोहे सभापत्यं कुर्वन् समिते: राष्ट्रिय: अध्यक्ष: डा. सदानन्ददीक्षित: समवेतान् प्रशिक्षार्थि-प्राध्यापकान् उद्बोधितवान् यत् संस्कृतशिक्षासुरक्षाप्रसारणम् अस्माकं कुलव्रतम्। भारतस्यास्तित्वं गौरवं च संस्कृताश्रितम्। अत: संस्कृतस्य विश्वव्यापिप्रचारेण भारतस्य गौरवं वर्धिष्यते। सर्वे संस्कृतच्छात्रा: प्रतिवर्षं साध्ययनं एकमासं यावत् संस्कृतप्रचारार्थं समर्पितहृदयेनाग्रेसरा भवन्तु इति आह्वानं दत्तवान्। शिविरस्योद्घाटका: सारस्वत निगमानन्दाश्रमस्याध्यक्षा: पूज्यस्वामिन: डा. शंकरानन्द सरस्वतीमहाराजा: संस्कृत-सुरक्षाद्वारा भारतीयता-राष्ट्रियता-धार्मिकता सुरक्षिता भविष्यतीति स्वाभिमतं प्रकाश्य शिविरस्य साफल्यार्थं शुभेच्छां प्रकटितवन्त:। प्रारंभे वेदभवनस्याध्यापक: पण्डितदयानिधि पण्डा वैदिकमंगलाचरणं कृतवान्। तत: प्राध्यापिका डा. हरप्रिया दाश स्वागतभाषणं कृतवती। तिरूपतिस्थ राष्ट्रियसंस्कृतविद्यापीठस्याचार्य: प्रो. सत्यनारायणाचार्य: मुख्यवक्तृरूपेण लोकभाषाप्रचारसमिते: लक्ष्यम् आभिमुख्यं सफलकार्यक्रमान् च सूचितवान्। समिते: पूर्वप्रचारक: किन्तु चेन्नईस्थ-केन्द्रीयविद्यालयस्य वर्तमानप्राचार्य: डा. वि.कल्याणरामन् समिते: प्रचारकरूपेणानु



प्रशिक्षार्थिन्य: बालिका:



प्रशिक्षार्थिन: बालका:


योगाभ्यासरता: प्रशिक्षार्थिन:

भूतान् सुखमयदिवसान् विवृत्तवान्। केन्द्रीयप्रशिक्षिका प्रतिमारथ: मनोव्यंजकानि संस्कृतशिविरगीतानि



संभाषणाभ्यासवर्गं चालयति श्रीसुशान्तकुमार साहु:

श्रावयित्वा सर्वान् मोहितवती। चतुर्धामवेदभवनस्य संपादक: पण्डितश्यामसुन्दरदाश: संस्कृतभाषां राष्ट्रभाषां कर्तुं प्रयास: करणीय: इति प्रबोधितवान्। श्रीजगन्नाथवेदकर्म-काण्डमहाविद्यालयस्य यशस्विप्राचार्य: डा. जनबन्धुमिश्र: प्रशिक्षणशिविरस्य सर्वात्मकसाफल्यं कामयमान: प्रत्येकं संस्कृतविद्यार्थी संस्कृतसुरक्षासैनिको भवतु इति उद्बोधितवान्। समिते: राष्ट्रियसचिवा डा. मनोरमा दाश: धन्यवादम् अर्पितवती। प्रशिक्षणशिविरस्य संयोजक: विभूतिनारायण कर: सूचितवान् यत् - आवासिक -शिविरेऽस्मिन् राज्यस्य विविधमहा-विद्यालयेभ्य: ८३ विद्यार्थिन: भागं नयन्ति। दशदिनपर्यन्तं प्रत्यहं प्रात: ४.४५ वादनात् रात्रौ १० बादनपर्यन्तं विविधकार्यक्रमा:प्रशिक्षकै: सुचारुतया प्रचालिता:। प्रशिक्षकरूपेण शारदासागर महान्ति: प्रात: स्मरणं, योगाभ्यासं च सुशान्तकुमार साहु: संस्कृतसंभाषणवर्गं, लक्ष्मीधर बेहेरा व्याकरणवर्गं, अरुणकुमार त्रिपाठी संभाषणाभ्यासवर्गम्, मनोरंजनपूजारी मनोरंजनवर्गं, डा.



प्रकाशचन्द्र मिश्र: संस्कारवर्गं, प्रतिमा रथ: संगीतवर्गं परिचालितवन्त:। तथैव विभिन्नदिवसेसु बौद्धिकवर्गेषु उपस्थाय प्रो. प्यारीमोहन पट्टनायक:, प्रो.जगबन्धु मिश्र:, डॉ. सुष्मन्तद्विवेदी प्रो. रमाकान्तमिश्र: छात्रेषु विविधविषयान् चर्चितवन्त:। डा. राजेन्द्र प्रसाद केन्द्रीयकृषिविश्वविद्यालयस्य कुलाधिपति: मान्य: प्रो. प्रफुल्लकुमार मिश्र:, केन्द्रीयविद्यालयसंगठनस्य सहकारिनिदेशक: डा. दु:शासन ओझा श्री सदाशिवपरिसरस्यो-पाचार्यचरा डा. स्नेहलता नन्द: समागत्य छात्रेषु उत्साहविश्वासान् भरितवन्त:।

२४.५.२०१८ सायंकाले शिविरस्य समापनसमारोह: वेदकर्मकाण्ड महाविद्यालय- सभागृहे समायोजित:। तत्र डा. सदानन्ददीक्षित: साभापत्यं कृतवान्, समिते: बरिष्ठप्रचारक: अधुना राजस्थानसर्वकारस्य संस्कृतशिक्षाधिकारी डा. निरंजनसाहु: मुख्यातिथिरूपेण उपस्थाय दीपप्रज्वालनपूर्वकं समारोहमुद्घाटितवान्। आदौ शिविरछात्राभि: स्वागतसंगीतं प्रस्तुतं, अनन्तरं प्रशिक्षक: श्रीसुशान्तकुमार साहु: सभां परिचालितवान्। मुख्यातिथि: डा. साहु: लोकभाषाप्रचारसमिति: सर्वेषां संस्कृतविद्यार्थिनां प्रिया सती कथं सहस्रश: विद्यार्थिनां जीवनपथं सुगमं सफलं च कृतवती तत् सोदाहरणं विवृत्तवान्। डा. हरप्रियादाश: प्रशिक्षणशिविरस्य साफल्येन आनन्दं प्रकटितवती । प्रशिक्षार्थिषु केचन स्वीयां शिविरानुभूतिं सोल्लासं प्रकटितवन्त:। प्रशिक्षिका प्रतिमा संगीतं प्रस्तुतवती। अन्ते प्रशिक्षक: श्रीगुरुप्रसादरथ: धन्यवादं वितरितवान्। शिविरछात्रै: संस्कृतनाटकानि





संस्कृतशोभायात्रा

मनोरंजकतया प्रदर्शितानि। शिविरस्य संयोजकरूपेण श्रीविभूतिनारायणकर- श्री विनायकप्रधान - श्रीदयानिधिपण्डादीनां स्तुत्यं सहयोगं सर्वे सहर्षं प्रकाशितवन्त:। विशेषत: कुरालमहाविद्यालय-स्याध्यापिका श्रीमती सुषमामंजरी पाणिग्राही, बरगड़त: अध्यापक: रूपबन्तप्रधान:, केन्द्रापडात: पं. डा. किशोर चन्द्र मिश्र:, कलाहाण्डित: हिमाचल नायक:, तालचेरत: डा. सुनेलीदेई समेतानां सहयोग: अविस्मरणीय: इति श्री कर: धन्यवादप्रसंगे सूचितवान्।



समापनसमारोहे मुख्यातिथि: डॉ निरञ्जनसाहु: उद्घाटयति

## विश्वयोगगुरव: स्वामिरामदेवमहाराजा: संदृष्टा:

पुरीनगरे षष्ठसंस्कृतमहाधिवेशने योगदानाय निमन्त्रणं कर्तुं समिते: राष्ट्रियाध्यक्ष: डा. सदानन्ददीक्षित: गते ८.०५.२०१८ दिनाङ्के स्वामिरामदेव



महोदयै: सह पंतजलि-योगविश्वविद्यापीठ परिसरे मिलितवान्। तदानीं लोकभाषा-प्रचारसमिते: स्वरूपं लक्ष्यम् उद्देश्यं सफलतां च डा. दीक्षित: तान् सूचितवान्।

## काञ्चीपीठ-शङ्कराचार्यपादा: संदृष्टा:



लोकभाषाप्रचारसमिते: अध्यक्ष: डा. सदानन्ददीक्षित: विश्वप्रसिद्धं काञ्चीकामकोटिपीठम् परिदृश्य पूज्य शंकराचार्यपादान् श्रीविजयेन्द्रसरस्वती-महाराजान् मिलितवान्। निरर्गलसंस्कृं भाषमाणा: स्वामिचरणा: संस्कृत-महाधिवेशने उपस्थातुं न शक्ष्यन्ति, किन्तु शुभसन्देशं प्रेषितवन्त:।

## द्वितीयसंस्कृतभाषायोगस्याध्यक्षा: मिलिता:

डा. सदानन्ददीक्षित: चेन्नईनगरे निवसद्भि: भारतस्य द्वितीयसंस्कृता-योगस्याध्यक्षै: श्री. एन्. गोपालस्वामिभि: सह मिलित्वा संस्कृतभाषाशिक्षा-सुरक्षा-



प्रसारदिविषयेषु चर्चां कृतवान् । तथैव मईमासान्ते पुरीनगरे आयोजयिष्यमाणे संस्कृतमहाधिवेशने आगन्तुं निमन्त्रितवान्।



**संस्कृत प्रशिक्षक -प्रशिक्षणशिविरम्**

भाद्रव पूर्णिमात: नवमी पर्यन्तम्

२६.०८.२०१८ - ४.११.२०१८,

स्थानम् - सरस्वतीविहार, बरपदा, भद्रक,

संपर्क: -९४३८२९८१८१, ९९३७९३८१७८

श्री सदाशिवपरिसरस्य राष्ट्रियसंस्कृतसंस्थानस्य सहायकाचार्य: डा. सुशान्तकुमारराज: 'लोकभाषासुश्री:' पत्रिकाया: संपादनादायित्वं नीतवान्। तस्मै धन्यवाद:।

प्रापक:

..........................................

..........................................

..........................................

पिन् ..........................................


RNI Regd. No. : 1811/1997/ORISAN0005

Printed and published by Dr. Manorama Dash, Secretary, Lokabhasha Prachara Samitih at Sarasvati Vihar, Barapada, Bhadrak, Odisha, Pin-756113

**Chief Editor : Dr. Sadananda Dikshita, Editor : Dr. Sushanta Kumar Raj**

मूल्यम् वर्षिकम् १००.०० खण्डम् १०.००